## अथ महाषोढान्यासः[1]

प्रपञ्चो भुवनं मूर्तिर्मन्त्रदैवतमातरः।
महाषोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः।।

अस्य श्रीमहाषोढान्यासस्य ब्रह्मा ऋषिः, जगतीच्छन्दः श्री अर्धनारीश्वरो देवता, श्रीविद्याङ्गत्वेन न्यासे विनियोगः (इति ऋष्यादिकं स्मृत्वा मूर्धादिषु विन्यस्याऽङ्गन्यासं[2] कुर्यात्)।

**ॐ ऐं ह्रीं श्रीं ह्सौः स्हौः** (६) इति षडक्षरमन्त्रपूर्वकं सर्वं न्यसेत्। यथा–

| | |
|---|---|
| ६ हों ईशानाय नमः | (अङ्गुष्ठयोः), |
| ६ हें तत्पुरुषाय नमः | (तर्जन्योः), |
| ६ हुं अघोराय नमः | (मध्यमयोः), |
| ६ हिं वामदेवाय नमः | (अनामिकयोः), |
| ६ हं सद्योजाताय नमः | (कनिष्ठिकयोः), |
| ६ हों ईशानाय नमः | (मूर्ध्नि), |
| ६ हें तत्पुरुषाय नमः | (मुखे), |
| ६ हुं अघोराय नमः | (हृदये), |
| ६ हिं वामदेवाय नमः | (गुह्ये), |
| ६ हं सद्योजाताय नमः | (पादयोः), |
| ६ हों ईशानायोर्ध्ववक्त्राय नमः | (मूर्ध्नि अङ्गुष्ठेन), |
| ६ हें तत्पुरुषाय पूर्ववक्त्राय नमः | (मुखे, तर्जन्या), |
| ६ हुं अघोराय दक्षिणवक्त्राय नमः | (दक्षकर्णे, मध्यमया), |
| ६ हिं वामदेवायोत्तरवक्त्राय नमः | (वामकर्णे, अनामिकया), |
| ६ हं सद्योजाताय पश्चिमवक्त्राय नमः | (चोरकूपे, कण्ठाधः, कनिष्ठया), |

(अयं पञ्चवक्त्रन्यासः क्रमेणाङ्गुष्ठादिपञ्चाङ्गुलीभिरेकैकाङ्गुलिनैकेक–वक्त्रे न्यस्तव्यः। एवं न्यासं विधाय ततो **"ह्सां ह्सीं ह्सूं ह्सैं ह्सौं ह्सः"** इत्यादिभिः करषडङ्गन्यासं कृत्वा वक्ष्यमाणरूपं देवं हृदये ध्यात्वा न्यसेत्)। ओघप्रकारान्तरेण ध्यानम्–

---

1. केवलं पूर्णाभिषिक्तानां श्रीमहाषोडश्युपासकानां कृते।

2. अङ्गन्यासन्तु — अङ्गुलीदेहवक्त्रात्मकः।